# Tulasi

सुरसा तुलसी कृष्णा चक्ररपर्णी सुमञ्जरी ।
भूतप्रिया नागमाता तुलसी सुरसाग्रणी ॥

द्वितीया सुरसा गौरी श्वेता सुरभिमञ्जरी ।
श्रीमञ्जरी भूतकेशी तुलसी सुरसाग्रणी ॥ **(Mdn)**

Krsna tulasi is otherwise called as Surasa,Cakraparni, Sumanjari, Bhutapriya, Nagamata, Surasagrani.

Sveta tulasi is also called as Gauri, Sveta, Surabhimanjari, Srimanjari, Bhutakesi, Surasagrani.

बर्बरी कवरी तुङ्गी खरपुष्पाजगन्धिका ।
पर्णासस्तत्र कृष्णे तु कटिल्लक कुठेरको ॥

तत्र शुक्लेऽर्जकः प्रोक्तो वटपत्रस्ततोऽपरः । **(Bpn)**

Barbari, Kavari, Tungi, Kharapuspa, Ajagandhika, Parnasa, Krsna, Katillaka, Kutheraka are the synonyms for Krsna variety.

Sukla is Arjaka, Vata patra.

अर्जकः क्षुद्रतुलसी क्षुद्रतुलसी क्षुद्रुर्णी मुखार्जकः ।
उग्रगन्धश्च जम्बीरः कुठेरश्च कठिञ्जरः ॥
सितार्जकस्तु वैकुण्ठो वटपत्रः कुठेरकः ।
जम्बीरो गन्धबहुलः सुमुखः कटुपत्रकः ॥

कृष्णार्जकः कालमालो मालुकः कृष्णमालुकः ।
स्यात् कृष्णमल्लिका प्रोक्ता गरघ्नो वनबर्बरः ॥ **(Rjn)**

Arjaka, Ksudratulasi, Ksudraparni, Mukharjaka, Ugragandha, Jambira, Kuthera, Kathinjara, Sita arjaka, Vaikuntha, Vatapatra, Kutheraka, Jambira, Gandha bahula, Sumukha, Katupatraka, Krsna arjaka, Kalamala, Maluka, Krsna maluka, Krsna mallika, Garaghnam , Vanabarbara.

बर्बरीत्रितयं रूक्षं शीतं कटु विदाहि च ।
तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च ॥
पित्तलं कफवातास्त्रकण्डूकृमिविषापहम्  ॥ **(Bpn)**

All the 3 types of Barbari are Ruksa, Sita in virya, Katu in rasa, Vidahi, Tiksna, Rucikara, Hrdya, Dipana, Laghu in Paki, Pittala, Kapha-Vata-Asra-Kandu-Krmi-Visha hara.

अर्जकः शीतलस्तिक्तः श्लेष्मामयविनाशनः ।

द्विविधं च विषं हन्याद्  दुष्टरक्तविनाशनः ॥

त्रयाऽर्जकाः कटूष्णाः स्युः कफवातामयापहाः ।
नेत्रामयहरा रुच्याः सुखप्रसकारकाः ॥ **(Rjn, Dhn)**

Arjaka is Sita in Potency, Tikta in Rasa, Slesma amaya vinasana.

Second variety is Visha hara, Dusta rakta Vinasa.

Third variety is Katu in Rasa, Usna in Potency, Kapha-Vata Amaya hara, Netramaya hara, Rucya, Sukha prasavakara.

अर्जकाः कटुका रूक्षा कटुपाकविदाहिनः ।

तीक्ष्णा रुचिकरा हृद्या दीपना लघवेऽहिमाः ॥
पित्तला कफवातघ्ना घ्नन्ति कण्डूविषकृमीन् । **(Kdn)**

Arjaka, is Katu in Rasa, ruksha in Guna, Katu in Paka, Vidahini, Tikshna, Rucikara, Hrdya, Dipana, Laghu, Hima in Potency, Pittala, Kapha Vataghna, cures Kandu, Visha, Krmi.

सुरसस्तुलसी सुरभी गौरी सुमञ्जरी कृष्णा ।
बहुमञ्जर्यलसा श्री भूलघ्नी देव (दुन्दु)भी) सुरसी ॥
अपेतराजसी चेति कथ्यतेऽरुचिपात्रिका ।
विष्णुप्रिया नागमाता शब्दैः पर्यायवाचकैः ॥

एतैरेवोच्यते गौरसुरसो नामकोविदैः ।
नामभिर्गौरसंयुक्तैर्यथा स्यात् गौरमञ्जरी ॥ **(Aa ma)**

Surasa, Tulasi, Surabhi, Gauri, Sumanjari, Krsna, Bahumanjari, Alasa, Sri, Bhutaghni, Devadundubhi, Surasi, Apetarajasi, Arucipatrika, Vishnu priya, Nagamata- are the synonyms for Krsna Tulasi.

Gaura Tulasi also has similar names with the exception that the names are prefixed with Gaura likje Gaura Manjari etc.

तुलसी सुरसा ग्राम्या सुलभा बहुमञ्जरी ।
अपेतराक्षसी गौरी शूलघ्नी देवदुन्दुभिः ॥ **(Bpn)**

Tulasi is otherwise called Surasa, Gramya, Sulabha, Bahumanjari, Apetaraksasi, Gauri, Sulaghni, and Devadundubhi.

तुलसी सुभगा तीव्रा पावनी विष्णुवल्लभा ।
सुरेज्या सुरसा ज्ञेया कायस्था सुरदुन्दुभी ॥

सुरभिर्बहुपत्री च मञ्जरी सा हरिप्रिया।
अपेतराक्षसी श्यामा गौरी त्रिदशमञ्जरी ॥
भूतघ्नी पूतपत्री च ज्ञेया चैकोनविंशतिः। **(Rjn)**

Tulasi, Subhaga, Tivra, Pavani, Vishnuvallabha, Surejya, Surasa, Kayastha, Suradundubhi, Surabhi, Bahupatri, Manjari, haripriya, Apetarakshasi, Syama, Gauri, Tridasa manjari, Bhutaghni, Putapatri.

सुगन्धा तिक्तकटुका कृमिकुष्ठप्रणाशिनी।
कासहिक्काश्वासहरा तुलसी विषनाशिनी ॥ **( Mdn)**

Tulasi is Sugandha, Tikta, Katu in Rasa, cures krmi, Kustha, Kasa, Hikka, Svasa, and Visha.

तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत्।
दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ॥

शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता। **(Bpn)**

Tulasi is Katu, Tikta in Rasa, Hrdya, Usna in Potency, Daha-Pitta kara, Dipani, cures Kustha, Krcchra asra, Parsva rujam, Kapha-vata.

Krsna and Sveta Tulasi are more or less similar in Properties.

तुलसी लघुरुष्णा च रूक्षा कफविनाशिनी।
कृमिदोषं निहन्त्येषा रुचिकृत् वह्निदीपनी ॥ **( Dhn)**

Tulasi is Laghu in Guna, Usna in Potency, Ruksha in Guna, Kapha vinasini, Krmi Dosham Nihanti, Ruci karaka, Vahni Dipani.

तुलसी कटुतिक्तोष्णा सुरभिः श्लेष्मवातजित् ।
जन्तुभूतकृमिहरा रुचिकृद्वातशान्तिकृत् ॥ **(Rjn)**

Tulasi is Katu, Tikta in Rasa, Usna in Potency, Surabhi, Slesma vatajit, Jantu-Bhuta-Krmi hara, Ruci krd, Vata Santi kara.

श्वेता कृष्णा च तुलसी कटुष्णा चोषणा जगुः ।
दाहपित्तकरी हृद्या तुवरा ह्यग्निदीपिका ॥
लघ्वी वातकफश्वासकासहिध्माकृमीन् जयेत् ।
वान्तिदौर्गन्ध्यकुष्ठनि पार्श्वशूलविषापहा ॥
मूत्रकृच्छ्रं रक्तदोषं भूतबाधां च नाशयेत् ।
शूलं ज्वरं च हिक्कां च नाशयेदिति कीर्त्तिता ॥ **(Nir)**

Both Sveta and Krsna Tulasi are Katu in Rasa, Usna in Potency, Daha Pitta kari, Hrdya, tuvara in Rasa, Agni dipika, Laghu, cures Vata, Kapha, Svasa, Kasa, Hidhma, Krmi, Vanti, daurgandhya, Kustha, Parsva sula, Visha, Mutrakrcchra Rakta dosha, Bhutabadha, Sula, Jvara, Hikka.

तुलसी पित्तकृत् वातकृमिदौर्गन्ध्यनाशिनी ।
पार्श्वशूलारतिश्वासकासहिक्काविकारजित् ॥ **(Rav)**

Tulasi is Pitta karaka, Vata-krmi-Daurgandhya nasani, cures Parsva sula, Arati, Svasa, Kasa, Hikka.

तुलसी तुवरा तिक्ता तीक्ष्णोष्णा कटुपाकिनी ।
रूक्षा हृद्या लघुः कट्वी दाहपित्ताग्निवर्धनी ॥
जयेद् वातकफश्वासकासहिध्मावमिकृमीन् ।

दौर्गन्ध्यपार्श्वरुक्कुष्ठविषकृच्छ्राश्मदृग्गादान् ॥ **(Kdn)**

Tulasi is Tuvara, Tikta in Rasa, Tiksna in Guna, Usna in Potency, Katu in Paka, Ruksa, Hrdya, Laghu, Katu in Rasa, cures Daha, Pitta, is Agni vivardhani, cures Vata, Kapha, Svasa, kasa, Hidhma, Vami, Daurgandhya, Parsva ruja, Kustham, Visha, Krcchra asma, Drk Gada.